# काव्यभेदपरम्परा

**डॉ शुभो वनिक्**
**भूतपूर्वः गवेषकः, राष्ट्रियसंस्कृतविश्वविद्यालयः, साहित्यविभागः, तिरुपतिः**

***सारसंक्षेपः***

संस्कृतकाव्यशास्त्रे काव्यस्वरूपनिर्णयस्य समानान्तरं काव्यभेदनिरूपणमपि अत्यन्तमहत्त्वपूर्णं विषयम् अस्ति। विभिन्नाचार्यैः स्वस्वदृष्टिकोणानुसारं काव्यस्य विविधाः भेदाः प्रतिपादिताः, येषां मध्ये इन्द्रियग्राह्यता, शैली, भाषा, विषयवस्तु, रचना-विन्यासः तथा रसात्मकता इत्यादयः प्रमुखाः आधाराः सन्ति। सर्वप्रथमं दृश्यत्वश्रव्यत्वभेदेन काव्यं द्विधा विभक्तम्—दृश्यकाव्यं तथा श्रव्यकाव्यम्। अभिनयरूपेण रंगमञ्चे प्रस्तुतं काव्यं दृश्यकाव्यं, तस्य प्रमुखभेदौ रूपकम् उपरूपकं चेति; श्रवणयोग्यं गद्यपद्यात्मकं साहित्यं श्रव्यकाव्यम् इति व्यवह्रियते।

श्रव्यकाव्यस्य पुनः अर्थरमणीयतायाः आधारेण उत्तम, मध्यम, अवर इति त्रिविधो भेदः निर्दिष्टः। भोजराजेन वर्ण्यवस्त्वाधारेण काव्यं, शास्त्रं, इतिहासः, काव्यशास्त्रम्, काव्येतिहासः, शास्त्रेतिहासश्च इति षड्विधं वर्गीकरणं कृतम्। भाषाभेदेन संस्कृत, प्राकृत, अपभ्रंश इति त्रिविधता स्वीकृता, किन्तु एतत् वर्गीकरणं तुलनात्मकदृष्ट्या स्थूलमेव मन्यते।

शैलीदृष्ट्या गद्य, पद्य, मिश्र इति त्रिविधः काव्यभेदः विशेषतया दण्डिना, वाग्भटेन च प्रतिपादितः। गद्यकाव्यस्य कथा, आख्यायिका इत्यादयः भेदाः, पद्यकाव्यस्य च प्रबन्ध तथा मुक्तक इति द्विविधः विभागः प्रसिद्धः। प्रबन्धकाव्ये महाकाव्यं खण्डकाव्यं चेति द्वौ प्रमुखौ प्रकारौ, यत्र महाकाव्यं विस्तीर्णकथानकयुक्तं, रसप्रधानं, सर्गबद्धं च भवति। मुक्तककाव्ये प्रत्येकं पद्यं स्वतन्त्रं पूर्णार्थं च भवति। छन्दःसंख्याधारेण मुक्तक, युग्मक, संदानितक, कलापक, कुलक इत्यादयः उपभेदाः प्रतिपादिताः।

एवं दृश्यते यत् संस्कृतवाङ्मये काव्यभेदपरम्परा अत्यन्तसमृद्धा, बहुआयामी च अस्ति। विभिन्नाचार्याणां मतभेदाः केवलं सिद्धान्तवैचित्र्यं न प्रकाशयन्ति, अपितु भारतीयकाव्यशास्त्रस्य गाम्भीर्यं, सूक्ष्मता, तथा व्यापकदृष्टिं च प्रतिपादयन्ति। अतः काव्यभेदपरम्पराया अध्ययनं संस्कृतसाहित्यस्य सैद्धान्तिकाधारबोधाय अत्यावश्यकम्।

**कूटशब्दाः -** संस्कृतवाङ्मयम्, काव्यशास्त्रम्, काव्यभेदपरम्परा, दृश्यकाव्यम्, श्रव्यकाव्यम्, रूपकम्, उपरूपकम्, गद्यकाव्यम्, पद्यकाव्यम्, मिश्रकाव्यम्, महाकाव्यम्, खण्डकाव्यम्, मुक्तककाव्यम्, आख्यायिका, कथा, रसात्मकता, भोजराजः, दण्डी, मम्मटः, विश्वनाथः.

काव्यलक्षणवत् काव्यभेदनिरूपणविषये आचार्येषु मतविरोध: दृश्यते । लक्षणग्रन्थेषु काव्यस्य प्रकार : आचार्यैः बहुधा चर्चितः। इन्द्रियग्राहितायाः आधारेण द्विप्रकारक: काव्यभेदः स्वीकृत: दृश्यं श्रव्यञ्च –

**दृश्यश्रव्यत्वभेदेन पुन: काव्यं द्विधा मतम् ।**
**दृश्यं तत्राभिनेयं तद्रुपारोपात्तु रूपकम् ।।** [1]

1 सा.द. - ६-१

काव्यं यत् रङ्गमञ्चेषु चतुर्विधाभिनयैः[2] अभिनीतं[3] भवति तद् दृश्यमेवञ्च यत् श्रवणयोग्यं भवति तद् श्रव्यमुच्यते । भारतीय- काव्यपरम्परायामपि काव्यस्य द्वे रूपे स्वीकृते । दृश्यकाव्यस्यापि रूपकमुप- रूपकञ्च रूपद्वयं स्वीकृतम् । रूपकस्य गद्यपद्ययोः मिश्रशैल्या अभिव्यक्तिर्भवतीति कारणात् तस्य दृश्यकालेषु अन्तर्गतं भवति । दृश्यकाव्यप्रदर्शकानां(नटानां) पूर्वचित्रितचरित्राणां स्वात्मनि आरोपत्वात् दृश्यकाव्यं रूपकमित्युच्यते[4] । यथा नटे रामाद्यवस्थारोपः, मुखचन्द्रादिवत् इत्यादि प्रयोगः । अर्थात् चाक्षुषप्रत्यक्षजन्यत्वात् रसात्मकवाक्यरूपं काव्यं दृश्यकाव्यमुच्यते ।

वस्तुनेतारसानां भिन्नताकारणेन नाटकं, प्रकरणं, भाणः, प्रहसनं, डिमः, व्ययोगः, समवकारः, वीथी, अङ्कः, इहामृगः- इत्येते दशभेदा: दर्शिताः । तथैव उपरूपकस्य नाटिकात्रोटकगोष्ठीसट्टकादयः अष्टादशभेदाः प्रदर्शिताः । तेषु रूपकं नाट्यं तथा उपरूपकं च नृत्यं भवति ।

हेमचन्द्रः रूपकोपरूपकयो: भेदान् सर्वान् एकीकृत्य तान् पाठ्यं गेयञ्च– भेदद्वये विभाजितवान्[5]-

**पाठ्यं नाटकप्रकरणनाटिकासमवकारेहामृग डिमव्ययोगोत्सृष्टिकाङ्कप्रहसनभाणवीथीसट्टकादि।**
**गेयं डोम्बिकाभाणप्रस्थानाशङ्गभाणिकाप्रेरणरामाक्रीड- हल्लीसकरासकगोष्ठी- श्रीगदितरागकाव्यादि ॥**
[6]

भोजराज: स्वीये ग्रन्थे सरस्वतीकण्ठाभरणे दृश्यश्रव्यकाव्ययोः वैसादृश्यं स्पष्टं कृत्वा कथयति-यत् नाभिनययोग्यं न च दर्शनीयं केवलं कर्णेन्द्रियग्राह्यं तद् श्रव्यमुच्यते । [7] दृश्यकाव्यस्य रसास्वादः सामान्यजनैरपि कर्तुं शक्यते इति हेतो: आचार्य: भरतमुनि: नाटकं सार्ववर्णिकं पञ्चमं वेदं कथयति ।

श्रव्यकाव्यस्य अर्थरमणीयतायाः आधारेण काव्यं त्रिधा विभज्यते– उत्तममध्यमावराणि । काव्ये यस्मिन् व्यंग्यार्थस्य रमणीयता भवति तदुत्तमकाव्यम् ।[8] यत्र व्यङ्गवाच्ययो: उभयोः रमणीयता तद् मध्यम- काव्यम्, एवं च यत्र वाच्यर्थस्य रमणीयता तत्रावरम् । किन्तु आचार्य- मम्मटस्य मतानुसारं व्यङ्गरहितं काव्यं भवति अवरम्[9] । अन्यत्र आचार्यः जयदेवः व्यङ्गरहितं काव्यं काव्यमेव न स्वीकरोति -

**सव्यंग्यमेव काव्यं न व्यंग्यरहितम् ।** [10]

यतोऽहि अर्थरमणीयता श्लोकस्य गद्यस्य वा एकदेशि भवति ।

पुनः वर्ण्यविचारस्याधारेण आचार्यः भोजराज: श्रव्यकाव्यस्य काव्यं,शास्त्रं, इतिहासः,काव्यशास्त्रं, काव्येतिहासः, शास्त्रेतिहासश्च- इति षड्भेदान् कृतवान् -

**काव्यं शास्त्रेतिहासौ च काव्यशास्त्रं तथैव च ।**

---

2 आङ्गिको वाचिकश्चैवमाहार्य: सत्त्विकस्तथा।। - सा.द. - ६-२

3 दृश्यं तत्राभिनेयं - सा.द.- ६

4 रूपकं तत्समारोपात् – द.रू.-१

5 प्रेक्ष्यं पाठ्यं गेयं च – का.अ. – ८/१

6 का.अ. - ८/४

7 श्रव्यं तत्काव्यमाहुर्यन्नेक्षते नाभिधीयते।
श्रोत्रयोरेव सुखदं भवेत्तदपि षड्विधम्।। - २-१४०

8 का.अ. - १-१९

9 शब्दचित्रं वाच्यचित्रमव्यंग्यं त्ववरं स्मृतम्। का.प्र. – १-५

10 च.आ. - ८-१

**काव्येतिहास: शास्त्रेतिहासस्तदपि षड्विधम् ॥** [11]

दर्पणकार: विश्वनाथः श्रव्यकाव्यनिरूपणावसरे कथयति यत् रसात्मकं वाक्यं श्रवणयोग्यं भवति अर्थात् रङ्गमञ्चे अभिनयव्यतिरिक्तम् अन्योपायैः यत् प्रस्तूयते तद् गद्यपद्याभ्यां श्रव्यमुच्यते – **श्रव्यं श्रोतव्यमानं तत्पद्यगद्यमयं द्विधा ।** [12]

भाषादृष्ट्या अपि काव्यस्य वर्गीकरणं जातम्[13] यत्र काव्यस्य संस्कृतं, प्राकृतं, अपभ्रंशः - त्रयो भेदा: प्रदर्शिताः । कवेरभिव्यक्ति: यया कया अपि भाषया भवितुमर्हति तथा महाकाव्य-खण्डकाव्यादिनां रचना कस्यामपि भाषायां कर्तुं शक्यते अत: इदं वर्गीकरणं नास्ति महत्त्वपूर्णम् । भाषानुसारं देशकालावस्थाधारेण कृतं वर्गीकरणं स्थूलमपि विशेषगुरुत्वं नावहति । [14]

काव्यशैलीदृष्ट्या काव्यस्य गद्यं पद्यञ्च - भेदद्वयं कृतमस्ति[15] यत्र पुन: आचार्य: दण्डी: गद्यपद्याभ्यां मिश्रकाव्यस्यापि योजनं कृत्वा संख्यात्रयमकरोत् ।[16] आचार्यौ भामहवामनौ गद्यं पद्यं च द्वौ भेदौ स्वीकृतवन्तौ। पुन: वाग्भट्टेन गद्यं पद्यं मिश्रञ्च - त्रयो भेदाः स्वीकृताः । तत्र छन्दोबद्धं पदं पद्यं, छन्दोविहीनं गद्यमेवञ्च उभयो: मिश्रितः वाङ्मयः मिश्रमभिहितवान् । दण्डिण: मतानुसारं सुवन्ततिङन्तपदसमुदाये गणमात्रादि नियमेन रहितं काव्यमस्ति गद्यकाव्यम् । आचार्यविश्वनाथ: छन्दोविहीनं शब्दार्थयोजनां गद्यकाव्यं कथयति । आचार्यः भरतानुसारं गद्ये यत्र पदेषु निश्चिताक्षराणामभावः भवति तत्र चूर्णं कथ्यते तथा पद्ये पदान्यक्षराणि वा निश्चितानि भवन्ति ।

कवे: अभिव्यक्तेः साधनं गद्यं पद्यस्यैव समानतया आदिकालादेव सामान्यव्यवहारे प्रयोगो भवति। [17] सामान्यगद्यात् गद्यकाव्ये विभिन्नता दृश्यते । गद्यकाव्येषु पद्यकाव्यवत् समस्तगुणा: सन्निविष्टाः भवन्ति तथा मस्तिस्कापेक्षया अत्र हृदयपक्षस्य प्रवलता विद्यते । पद्यसदृशं गद्येनापि कवि: कल्पनाया: तुङ्गशिखरमारोहति परन्तु पद्यवत् गद्ये आनन्दोत्पादनस्य क्षमता बह्वी कठिना, अत: गद्यं कविनां योग्यताधारः -**गद्यं कविनां निकषं वदन्ति।** [18]

राजशेखरः कथावस्तुनाम् उपस्थितेः अनुपस्थितेः वा अनुसारं गद्यकाव्यस्य पञ्चभेदान् शुद्ध-चित्र-कथोत्थ-संविधानक-आख्यानकानि कृतवान् । तत्र इतिहासरहितं शुद्धं, विस्तारपूर्वकं वर्णनं चित्रं, इतिहासयुक्तं कथोत्थं, घटनायाः सम्भावनायुक्तं वर्णनं संविधानकं एवमैतिहासिक- कल्पनामुक्तम् आख्यानकमुच्यते । [19]

बन्धाधारेण अग्निपुराणे गद्यकाव्यस्य पञ्चभेदाः प्रदर्शिताः, तद्यथा – आख्यायिका, कथा, खंडकथा, परिकथा कथानिका च[20] । परन्तु आचार्या: दण्डी, हेमचन्द्रः, वाग्भट्टः विश्वनाथश्च गद्यकाव्यस्य कथा आख्यायिका च भेदद्वयं स्वीकुर्वन्ति –

---

11 स.क. २-१३९

12 सा.द.- ६-३१३

13 अ.पु. - ३३७-८

14 अवस्थादेशकालादिविशेषैरपि जायते।
आनन्त्यमेव वाच्यस्य शद्धस्यापि विशेषतः।। ध.लो. - ४-७

15 शब्दार्थौ सहितौ काव्यं गद्यं पद्यञ्च तद्विधा। का.ल. -१-१६
श्रव्यं श्रोतव्यमानं तत्पद्यगद्यमयं द्विधा। सा.द. - ६-३१३

16 गद्यं पद्यं च मिश्रं च तत् त्रिधैव व्यवस्थितम्। का.द. १-११

17 त्वत्त पूर्वे हि विद्वांसो गद्यं ददृशुर्न पद्यम्। का.मी. - अध्याय:-३

18 आचार्य: दण्डी ।का.द.।

19 का.मी. - अध्याय: ९

20 आख्यायिका कथा खंडकथा परिकथा तथा।

**अपादः पदसन्तानो गद्यमाख्यायिका कथे ।** [21]

कथायाः रचना गद्ये पद्ये च उभयोः भवति तथा अस्याः नायकः धीरप्रशान्तः क्षेत्रं व्यपकं विस्तृतं चास्ति[22] ।

आचार्यः विश्वनाथः कथावस्तुनां गद्यकाव्यप्रभेदे एव अङ्गीकरोति तथा आर्यावक्त्रापवक्त्र - छन्दोभिः मंगलाचरणस्य खलादेः च कीर्तनस्य विधानं कृतवान् –

**कथायं सरसं वस्तु गद्यैरेव विनिर्मितम् ॥**
**क्वचिदत्र भवेदार्या क्वचिद्वक्त्रापवक्त्रके ।**
**आदौ पोर्नमस्कारः खलादेवृत्तकीर्तनम् ॥** [23]

आचार्यभामहानुसारम् आख्यायिका उदात्तार्थेन उच्छवासाभिः गद्यशैल्या च युक्ता भवति । नायकस्येतिवृत्तमपि तेन माध्यमेनैव स्पष्टं भवति एवं भाव्यार्थस्य सूचनमपि वक्त्रापवक्त्रछन्दाभ्यां क्रियते -

**गद्येन युक्तोदात्तार्था सोच्छवासाख्यायिका मता ।**
**वृत्तमाख्यायते तस्यां नायकेन स्वचेष्टितम्**
**वक्त्रं चापरवक्त्रं च काले भाव्यार्थशंसि च ॥** [24]

विश्वनाथानुसारम् आख्यायिका कथासदृशी अस्ति, तस्याः ,आरम्भे कविवंशवर्णनम् आवश्यकमस्ति । मध्ये कविप्रणीतानां छन्दसां वर्णनं भाव्यार्थस्य च सूचना स्यात्, एवं कथांशाः आश्वासैः विभाज्याः स्युः, आश्वासाः च आर्यवक्त्रापवक्त्राभिः छन्दोभिः आरभन्ते-

**आख्यायिका कथावत् स्यात् कवेवंशानुकीर्तनम् ।**
**अस्यमन्यकवीनां च वृत्तं पद्यं क्वचित् क्वचित् ॥**
**कथांशानां व्यवच्छेद आश्वास इति वक्ष्यते ।**
**आर्यावक्त्रापवक्त्राणां छन्दसां येन केनचित् ॥**
**अन्यपदेशेनाश्वासमुखे भाव्यर्थसूचनम् ।** [25]

तात्त्विकदृष्ट्वा आचार्यः दण्डीः कथाख्यायिकयोर्मध्ये भेदं नाङ्गीकृत्य एकस्यैव जातेः द्वे संज्ञेति अभिहितवान् तथा आख्यानकादिनां समस्तानां एकत्र संयोजितवान् –

**तत्कथाख्यायिकेत्येका जातिः संज्ञाद्वयांकिता ।**
**अत्रैवान्तर्भविष्यन्ति शेषाश्चाख्यानजातयः ॥** [26]

पद्यकाव्यस्य बन्धाधारण प्रबन्धं मुक्तकं च भेदद्वयं कृतमस्ति । प्रबन्धकाव्ये कथावस्तुनः प्रवाहः अविच्छिन्नरूपेण आद्यन्तं प्रवहति तथा प्रत्येकं सर्गच्छन्दानुच्छेदाः कथामुपरि आश्रिताः भवन्ति ।

---

कथानिकेति मन्यन्ते गद्यकाव्यं च पञ्चधा।। अ.पु. - ३३७-१२

21 का.द.- १-२३

22 धीरशान्तनायका गद्येन पद्येन वा सर्वभाषा कथा। का.अ. - ८-८

23 सा.द. - ६-३३२,३३३

24 का.ल. - १-२५,२६

25 सा.द. - ६- ३३४-३५

26 का.द.- १-२८

मुक्तककाव्ये पुन: प्रत्येकं पद्यं स्वतन्त्रं पुर्णं च भवति तथा चमत्कारोत्पादने सहायं भवति।[27] कल्पनाशक्तेः समाहार: भाषायाः समासशक्तेश्च अनुरूपमेव कविः मुक्तककाव्यरचनायां यश: प्राप्नोति।

प्रबन्धकाव्यमपि महाकाव्यखण्डकाव्याभ्यां द्विप्रकारकं भवति । महाकाव्ये जगत: मानवजीवनस्य च विस्तृतं वर्णनमुपलभ्यते। अस्य कथावस्तु प्रायशः प्राचीनाख्यानत: अथवा ऐतिहासिकेतिवृत्तात् गृह्यते। सर्गा: अष्टाधिका:, नायकश्च सद्वंशजः धीरेदात्तश्च भवति । नगर-समुद्र-पर्वत-सूर्योदय-ऋतु-विवाह-यात्रा-युद्धादिनां वर्णनम् उचितस्थलेषु दृश्यते । रसेषु श्रृङ्गारस्य वीरस्य वा प्राधान्यं भवति अन्ये च रसा: सहायकाः अङ्गरूपेण वा तिष्ठन्ति। एकस्मिन् सर्गे एकस्या एव छन्दसः प्रयोगः भवति सर्गान्ते च छन्दस: परिवर्तनं भाविसर्गस्य च सूचना भवति। आद्ये मंगलाचरणं, सज्जनस्तुतिः, खलनिन्दा – इत्यादयः विधीयन्ते -

**सर्गबन्धो महाकाव्यं तत्रैको नायकः सुरः ॥**
**सवंशः क्षत्रिया वापि धारोदात्तगुणान्वितः।**
**एकवंशभवा भूपाः कुलजा बहवोऽपि वा॥**
**श्रृङ्गारवीरशान्तानामेकोऽङ्गी रस इष्यते।**
**अङ्गानि सर्वेऽपि रसाः सर्वे नाटकसन्धयः ॥**
**इतिहासोद्भवं वृत्तमन्यद्वा सज्जनाश्रयम्।**
**चत्वारस्तस्य वर्गाः स्युस्तेष्वेकं च फलं भवेत्॥**
**आदौ नमस्क्रियाशीर्वा वस्तुनिर्देश एव वा।**
**क्वचिन्निन्दा खलादीनां सतां च गुणकीर्तनम्॥**
**एकवृत्तमयैः पद्यैरवसानेऽन्यवृत्तकैः।**
**नातिस्वल्पा नातिदीर्घाः सर्गा अष्टाधिका इह॥**
**नानावृत्तमयः क्वापि सर्गः कश्चन दृश्यते।**
**सर्गान्ते भाविसर्गस्य कथायाः सूचनं भवेत्॥**
**संध्यासूर्येन्दुरजनीप्रदोषध्वान्तवासराः।**
**प्रातमध्याह्नमृगयाशैलर्तुवनसागराः ॥**
**संभोगविप्रलम्भौ च मुनिस्वर्गपुराध्वराः।**
**रणप्रयाणोपयममन्त्रपुत्रोदयादयः ॥**
**वर्णनीया यथायोगं साङ्गोपाङ्गा अमी इह।**
**कवेर्वृत्तस्य वा नाम्ना नायकस्येतरस्य वा॥**
**नामास्य सर्गोपादेयकथया सर्गनाम तु।**[28]

अन्यत्र च -

**आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम्॥**

---

27 मुक्तकं श्लोक एवैकश्चमत्करक्षमः सताम्। अ.पु. – ३३७-३६

28 सा.द. - ६-३१५-३२४

**इतिहासकथाद्भूतमितरद्वा सदाश्रयम् ।**
**चतुर्वर्गफलायत्तं चतुरोदात्तनायकम् ॥।**
**नगरार्णवशैलतुचन्द्रार्कोदयवर्णनैः ।**
**उद्यानसलिलक्रीडामधुपानरतोत्सवैः ॥**
**विप्रलम्भैर्विवाहैश्च कुमारोदयवर्णनैः ।**
**मन्त्रदूतप्रयाणाजिनायकाभ्युदयैरपि ॥**
**अलंकृतमसंक्षिप्तं रसभावनिरन्तरम् ।**
**सगैरनातिविस्तीर्णैः श्रव्यवृत्तैः सुसंधिभिः ॥**
**सर्वत्र भिन्नवृत्तान्तैरुपेतं लोकरञ्जनम् ।**
**काव्यं कल्पान्तरस्थायि जायते सदलंकृति ॥**
**न्युनमप्यत्र यै: कैश्चिदङ्गः काव्यं न दुष्यति ।** [29]

पुन: महाकाव्यस्य कतिपयलक्षणैर्युक्तं यत् प्रबन्धकाव्यं तद् खण्डकाव्यमुच्यते[30] । तत्र एकस्या एव घटनायाः, रसस्यैकस्य भावस्य च प्राधान्यं वर्तते, सर्गा: अनधिका: अष्टाः भवन्ति । प्रभेदः अस्य एकविधैव । [31]

पद्यकाव्ये छन्दसां संख्याधारेण तस्य भेदोपभेदः स्वीकृतः । दण्डिना मुक्तककुलककोषसंघाता:- एते चत्वारः प्रभेदाः प्रदर्शिताः[32] । विश्वनाथ: मुक्तकं, संदानितकं, युग्मकं, कलापकं, कुलकमिति पञ्चप्रभेदं स्वीकरोति । पद्यं यत् कस्यचिदपि अन्यस्य पद्यस्याकाक्षया मुक्तं स्वतन्त्रं वा भवति तद् मुक्तकम्, यस्मिन् पद्यद्वये समग्रस्य भावस्य अभिव्यक्तिर्भवति तद् युग्मकम्, यस्य रचना पद्यत्रये पूर्णा भवति तद् सन्दनितकम्, पद्यचतुष्टये पञ्चके च रचितं पद्यं यथाक्रमं कलापकं कुलकञ्च भवति –

**छन्दोबद्धपदं पद्यं तेन मुक्तेन मुक्तकम् ।**
**द्वाभ्यां तु युग्मकं संदानितकं त्रिभिरिष्यते ॥**
**कलापकं चतुर्भिश्च पञ्चभि: कुलकं मतम् ।** [33]

आचार्य: वाग्भट्टः युग्मकं संदानितकञ्च द्वयमपि समानमङ्गीकृत्य कुलकस्य पञ्चत: द्वादशपर्यन्तं भेदान् स्वीकरोति – **तत्रैके न छन्दसा मुक्तकं, द्वाभ्यां युग्मं सांदानितकं च त्रिभिर्विशेषकं चतुर्भि: कलापकं द्वादशान्तैः कुलकम् ।** [34]

आचार्य: दण्डी: मुक्तकं प्रबन्धकाव्यस्यैव अङ्गं कथयति । राजशेखरः अपि पद्यकाव्यस्य इतिवृत्तस्य उपस्थित्यनुपस्थितिं चाधारीकृत्य शुद्धं, चित्रं, कथोत्थं, संविधानकम्, आख्यानकञ्च- पञ्चभेदेषु भेदीकृतवान्।

---

29 का.द. – १-१४,१९

30 खण्डकाव्यं भवेत्काव्यस्यैकदेशानुसारि च। सा.द. – षष्ठः परिच्छेदः।

31 यथा मेघदूतादि। सा.द. - षष्ठः परिच्छेदः।

32 मुक्तकं कुलकं कोष: संघात इति तादृशः। का.द. – १-१३

33 सा.द.- ६-३

34 का.अ. – प्रथम अध्यायः

शैलीदृष्ट्या कृतस्य काव्यभेदस्य तृतीयभेदः अस्ति गद्यपद्ययोः मिश्रणेन निष्पन्नं मिश्रकाव्यम्। रूपकोपरूपकादयः भेदाः कदाचित् मिश्रशैल्या निर्मितेऽपि ते दृश्यकाव्यान्तर्गतत्वेन परिगणिताः भवन्ति।

एवं स्पष्टं भवति यत् संस्कृतवाङ्मये काव्यभेदपरम्परा अत्यन्तं समृद्धा, सुविस्तृता च अस्ति। विभिन्नाचार्यैः इन्द्रियग्राह्यता, भाषा, शैली, विषयवस्तु, रसः बन्धः तथा रचनापद्धतिः इत्यादीनामाधारेण काव्यस्य बहवो भेदाः निरूपिताः। दृश्य-श्रव्य, गद्य-पद्य-मिश्र, प्रबन्ध-मुक्तक, महाकाव्य-खण्डकाव्यादयः विभागाः भारतीयकाव्यशास्त्रस्य सूक्ष्मदृष्टिं प्रकाशयन्ति। एषा परम्परा न केवलं काव्यस्वरूपस्य वैज्ञानिकं वर्गीकरणं करोति, अपितु संस्कृतसाहित्यस्य वैविध्यं, गाम्भीर्यं, सौन्दर्यबोधं च सुस्पष्टतया उद्घाटयति।

**सन्दर्भाः -**


- उपाध्यायः आचार्यः बलदेव (सं), अग्निपुराणम्, चौखम्बा सुरभारती प्रकाशन्, वाराणसी, तृतीयसंस्करणम् , २००५ ई.
- उपाध्यायः बलदेव, संस्कृत साहित्य का इतिहास, चौखम्बा सुरभारती प्रकाशन्, वाराणसी, १९६८ ई.
- उपाध्यायः आचार्यः श्रीबलदेवः, अग्निपुराणम्, चौखम्बा सुरभारति प्रकाशन, वाराणसी, 2005
- उपाध्यायः रामजी, आधुनिक संस्कृत – नाटक, भाग-२, चौखम्बा विद्याभवन, वाराणसी, पूनर्मुद्रण्, 2014 ई.
- उप्रेति थानेशचन्द्र (सं, अनु, हिन्दीव्याख्या), नाट्यदर्पणम्, परिमलप्रकाशनम्, दिल्ली,द्वितीयसंस्करणम्, १९९४ ई.
- एम् लक्षणस्वरूप,वरदाम्बिकापरिणयचम्पूः, मोतीलाल बनारसीदास, मुम्बई संस्कृत मुद्रणालय।
- कृष्णमाचारी,द हिस्ट्री आफ क्लासिकल संस्कृत लिट्रेचर, तिरुमाला तिरुपति देवस्थानम् प्रेस, मद्रास, 1937
- क्षेमराज श्रीकृष्णदास, अष्टाध्यायी, श्रीवेङ्कटेश्वर मुद्रणालय, 1954 संवत्
- चक्रवर्ती सत्यनारायणः(सं),ध्वन्यालोकः, आनन्दवर्धनः (ग्रन्थकर्ता), संस्कृत पुस्तक भाण्डार, ३८ विधान सरणी, कलकाता-७०००६, पञ्चमसंस्करणम्, २०१३ई.
- चक्रवर्ती सत्यनारायणः(सं), अभिज्ञानशकुन्तलम्, कालिदासः(ग्रन्थकर्ता), संस्कृत पुस्तक भाण्डार, ३८ विधान सरणी, कलकाता-७००००६, पञ्चमसंस्करणम्, २००८ ई.
- चक्रवर्ती सत्यनारायणः (सं), मेघदूतम्, कालिदासः(ग्रन्थकर्ता), संस्कृत पुस्तक भाण्डार, ३८ विधान सरणी, कलकाता-७००००६, तृतीयसंस्करणम्, २०१३ ई.
- चौधरी डॉ. सत्यदेव (व्याख्याकारः), काव्यालङ्कारः (रुद्रटप्रणीतः), परिमलपाब्लिकेशन्स, शक्तिनगरम्, दिल्ली, द्वितीयसंस्करणम्, १९९०ई.
- टि.के.बालसुब्रमणह्मम्,कुमारसम्भवचम्पूः, श्रीवाणीविलास प्रेस,1939
- डॉ. इ. बि. कोवेल, कौषीतकिब्राह्मणोपनिषद्, सि. एन. लेविब बाप्टिस्ट मिशन, कलकात्ता, 1861
- डॉ. वैस अरुणा कुमारी, अर्वाचीन संस्कृत साहित्य की काव्यशास्त्रीय अध्ययन, दुर्गा पाब्लिकेशन्स, दिल्ली, २०११ ई.
- त्रिपाठी डॉ. रमाशङ्कर, दशरूपकम्, विश्वविद्यालय प्रकाशन, वाराणसी

- त्रिपाठी डॉ. ब्रह्मानन्द, छन्दोमञ्जरी, चौकम्बा सुरभारती प्रकाशन, वाराणसी,2017
- त्रिपाठी राधावल्लभ, संस्कृत साहित्य का समग्र इतिहास, प्रथम & द्वितीय खण्ड, जैन अमर प्रिंटिं प्रेस, दिल्ली, प्रथम संस्करण, २०१८ ई.
- दास जयकृष्ण गुप्त हरिदासश्च, काव्यमीमांसा, चौखम्बा संस्कृत आफिस, वाराणसी, 1991
- दासः श्रीश्यामः (अनु. & सम्पा.), प्रभुः श्रीजीवगोस्वामि (ग्रन्थकारः), श्रीश्री गोपालचम्पूः (उत्तरचम्पूः), श्रीश्यामलालहकीम, श्रीहरिनामप्रेस, वृन्दावन्, द्वादशप्रकाशनम्, प्रथमसंस्करणम्, २०२६ विक्रमाब्दः।
- दासः श्रीरामपदार्थः, बृहदारण्यकोपनिषत्, श्रीरामानन्दवेदान्त- प्रचारकसमितिः, अहमदाबाद्, संवत् २०२५
- द्विवेदी कपिलदेवः, संस्कृतनिबन्धशतकम्, विश्वविद्यालय प्रकाशन, वाराणासी-1, 1980.
- द्विवेदी डा. कपिलदेव, संस्कृत साहित्य का समीक्षात्मक इतिहास, मुद्रक अनिल प्रिन्टर्स 198/13, एलगिन रोड इलाहबाद।
- द्विवेदी रेवाप्रसाद, व्यक्तिविवेकः, चौखम्बा संस्कृत संस्थान, के. 37/116, गोपाल मन्दिर लेन, वाराणसी-221001, फोन-(0542) 2333445.
- देवः राजा राधाकान्तः, शब्दकल्पद्रुम् (तन्त्रांशः), श्रुतिज्ञा (निर्माता), प्रो. मदनमोहन झा (निर्देशकः)।
- पाण्डुरङ्ग परव काशीनाथ,चम्पूरामायणम्, निर्णयसागराख्यमुद्रण- यन्त्रालयिधपतिना मुद्रयित्वा प्रसिद्धिं नीता, मुम्बाय्यां,1820
- बाहादुरः राजा राधाकान्तः, शब्दकल्पद्रुमः, अमर पब्लिकेशन्स, वाराणसी
- भट्टाचार्यः श्रीमद्हरिदाससिद्धान्तवागीशः(सं), महाभारतम्, व्यासदेवः(ग्रन्थकर्ता), विश्ववाणी प्रकाशनी, कलकाता, द्वितीयसंस्करणम्, १९७६ ई.
- भट्टाचार्यः श्रीमद गुरुनाथ विद्यानिधि (सं), अमरार्थचन्द्रिका, अमरसिंह (ग्रन्थकर्ता), संस्कृत पुस्तक भाण्डार, ३८ विधान सरणी, कलकाता-७००००६, २०१० ई.
- भारतीय महेशचन्द्रः, नीतिशतकम्, साहित्य भण्डार, सुभाष बाजार, मेरठ- २५०००२, दूरभाषः – ५१५६३८. 1999 ई.
- महाकविश्रविक्रमभट्टविरचित चण्डपालकृतया नलचम्पूः, निर्णयसागराख्यमुद्रणयन्त्रालयिधपतिना मुद्रयित्वा प्रसिद्धिं नीता, मुम्बाय्यां,1867
- मिश्रः अभिराजः राजेन्द्रः (ग्रन्थकारः), अभिराजयशोभूषणम्, वैजयन्तप्रकाशनम्, इलाहाबादः, प्रथमसंस्करणम्, २००६ ई.
- मिश्र पं. श्रीब्रह्मशङ्कर साहित्यशास्त्री, रघुवंशम्, चौखम्बा संस्कृत आफिस, वाराणसी, 2013
- मिश्रः डॉ. कामेश्वरनाथः, सरस्वतीकण्ठाभरणम्, भोजराजः (ग्रन्थकर्ता), चौखम्बा ओरियन्टालिया, वाराणसी, प्रथमसंस्करणम्, १९७६ई.
- मिश्रः राधेश्याम, वक्रोक्तिजीवितम्, चौखम्बा संस्कृत संस्थान, के. 37/116, गोपाल मन्दिर लेन, वाराणसी-221001, फोन-(0542) 2333445.
- मुखोपाध्यायः अञ्जलिका (सं), नाट्यशास्त्रम्, संस्कृत पुस्तक भाण्डार, ३८ विधान सरणी, कलकाता -७००००६, प्रथमं प्रकाशनम्, जानुयारी २०१८ ई.

- मुखोपाध्यायः विमलाकान्त (सं), साहित्यदर्पणः, संस्कृत पुस्तक भाण्डार, ३८ विधान सरणी, कलकाता-७००००६, द्वितीयं संस्करणम्, २०१३ ई.
- मोर मनसुखरायः, कूर्म-पुराणम्, गोपाल प्रिण्टिङ्ग् वर्क्स्, 5 Clive Row Calcutta -1. Christian era - 1962.
- वन्द्योपाध्यायः श्री अशोककुमार (सं); संस्कृत-वांला अभिधानम्, सदेश प्रकाशनम्, १०१B, विवेकानन्दरोड, कोलकाता-७००००६.
- रायः डॉ गङ्गासागरः (सम्पा.), राजशेखरः (ग्रन्थकारः), काव्यमीमांसा, चौखम्बाविद्याभवन्, वाराणसी, चतुर्थसंस्करणम्, २००० ई.
- वसु अनिल चन्द्र (सं), काव्यालङ्कारसूत्रवृत्तिः, संस्कृत बुक डिपो, २८/१ विधान सरणी, कलकाता-७००००६, द्वितीयं संस्करणम्, २००३ ई.
- वर्णेकर डा. श्रीधर भास्कर,संस्कृतवाङ्मयकोशः, भारतीय भाषा परिषद्,36A शेक्सपीयर सरणी,कलकत्ता 700017
- वसु अनिलचन्द्रः(सम्पा.), गङ्गादासः (ग्रन्थकारः), छन्दोमञ्जरी, संस्कृतबुकडिपो, २८/१ विधान सरणी, कलकाता-७००००६, पुनर्मुद्रणम्, मार्च २०१९ ई.
- वारियर् कृष्ण एन् वि, काव्यकौतुकम्, साहित्य अकादमी, रवीन्द्रभवन,35,फिरोजशाह रोड, न्यू दिल्ली 110001